**1970G A Prayer of Jin**

Jin Namaskarashtaka (In Sanmati Sandesh, ca. 1970)

# जिन नमस्काराष्टक स्तोत्र



(संकलयिता—श्री पं० हीरालालजी सिद्धान्तशास्त्री, ब्यावर)

१

तुभ्यं नमः सकल लोकहितंकराय, तुभ्यं नमः सकल कर्म विनाशकाय।
तुभ्यं नमः सकल जीव सुतारकाय, तुभ्यं नमो जिन वरेन्द्र, सुखाङ्किताय॥

२

तुभ्यं नमः सकल दोष विवर्जिताय, तुभ्यं नमः सकल मर्म-प्रदर्शकाय।
तुभ्यं नमः परम सेवक तारकाय, तुभ्यं नमो रविपतेर्मद नाशकाय॥

३

तुभ्यं नमोऽखिलकषाय विवर्जिताय, तुभ्यं नमोऽखिलभवोदधि शोषणाय।
तुभ्यं नमः परम केवल-ज्ञानदाय, तुभ्यं नमः परमदेव जिनेश्वराय॥

४

तुभ्यं नमः सकल दर्शन धारकाय, तुभ्यं नमः सकल ज्ञान प्रकाशकाय।
तुभ्यं नमः सकल वीर्य सुधारकाय, तुभ्य नमः सकल शर्म धराधिकाय॥

५

तुभ्यं नमः सकल सत्त्व हितंकराय, तुभ्यं नमो दश सुधर्म विवर्धकाय।
तुभ्यं नमः सकल पाप विनाशकाय, तुभ्यं नमः सकल तत्त्व-प्रकाशकाय॥

६

तुभ्यं नमः सकल व्यक्ति विनाशकाय, तुभ्यं नमः सकल भूषण भूषिताय।
तुभ्यं नमः सकल लोक विभासकाय, तुभ्यं नमः परमपूज्य निरंजनाय॥

७

तुभ्यं नमो हत प्रमाद, जिनाभिमाय, तुभ्यं नमः परम देव, मुनीश्वराय।
तुभ्यं नमः परमशान्त परस्थिताय, तुभ्यं नमो वसु गुणाङ्कित शर्मदाय॥

८

तुभ्यं नमस्त्रिभुवनार्तिहराय नाथ,
तुभ्यं नमः क्षितितलामल भूषणाय।
तुभ्यं नम स्त्रिजगतः परमेश्वराय,
तुभ्यं नमो जिन भवोदधि शोषणाय॥

★